स्निग्धः सुस्वच्छो वह्निदीपनः । निहन्ति शूलं वातामश्लेष्मश्वासगलामयान् । पाण्ड्वर्शोग्रहणीगुल्मानाहप्लीहहृदामयान् । सर्जिकाल्पगुणा तस्माद्विशेषाद्गुल्मशूलहृत् । सुवर्चिका सर्जिकावद् बोद्धव्या गुणतो जनैः" भावप्र० । २नदीभेदे च जटा० ।

**सर्जिकाक्षार** स्त्री सर्जिकायाः क्षारः । स्वनामख्याते क्षारभेदे (साजिमाटि) राजनि० ।

**सर्जिक्षार** पु० ६त० । (साजिमाटि) सर्जिकाक्षारे राजनि० ।

**सर्जु** पु० सृज—उन् । वणिग्जने मेदि० ।

**सर्जू** स्त्री सृज-ऊ । १विद्युति मेदि० २अभिसारे शब्दर० ।

**सर्ज्य** पु० सर्जस्येदं यत् । १सर्जरसे रत्नमा० । सृज-ण्यत् । २सर्जनीये त्रि० ।

**सर्प** पु० सृप—अच् । १नागकेशरे रत्ना० । २भुजङ्गे पुंस्त्री० अमरः स्त्रियां ङीष् । ३सर्पदैवते अश्लेषानक्षत्रे ज्यो०त० "सर्पणादऽभवन् सर्पा हीनत्वादहयः स्मृताः" वह्निपु० तन्नामनिरुक्तिः । भावे घञ् । ४गमने सुश्रुतोक्तं तद्भेदादिकम् अहिशब्दे ५८१ पृ० दृश्यम् । तद्दंशने तस्य दंष्ट्राभेदेन विषादिकं च भविष्यपु० उक्तं यथा

"दंष्ट्रा शुक्ला च कृष्णा च रक्ता पीता च दक्षिणा । समासेन तु वक्ष्यामि यथा वै वर्णतः स्मृताः । शुक्ला तु ब्राह्मणी ज्ञेया रक्ता तु क्षत्रिया स्मृता । वैश्या तु पीतिका ज्ञेया कृष्णा शूद्रा तु कथ्यते । अतःपरं प्रवक्ष्यामि दंष्ट्राणां विषलक्षणम् । दंष्ट्रायान्तु विषं नास्ति नित्यमेव भुजङ्गमे । दक्षिणं नेत्रमासाद्य विषं सर्पस्य तिष्ठति । संक्रुद्धस्यैव सर्पस्य विषं गच्छति मस्तके । मस्तकाद्धमनीं याति ततो नाड़ीषु तिष्ठति । नाड़ीभ्यो गच्छते दंष्ट्रे विषं तत्र प्रवर्त्तते । तत्सर्वं कथयिष्यामि यथावदनुपूर्वशः । अष्टभिः कारणैः सर्पो दशते नात्र संशयः । आक्रान्तो दशते पूर्वं द्वितीयं पूर्ववैरिणम् । तृतीयं दशते भीतश्चतुर्थं मददर्पितः । पञ्चमन्तु क्षुधाविष्टः षष्ठञ्चेह विषोल्वणः । सप्तमं पुत्ररक्षार्थम् अष्टमं कालचोदितम् । यस्तु सर्पो दशित्वा तु उदरं परिवर्त्तयेत् । वक्रभुग्नाकृतिर्दंष्ट्रा आक्रान्तं तं विनिर्दिशेत् । यस्य सर्पेण दष्टस्य गम्भीरं दृश्यते व्रणम् । वैरदष्टं विजानीयात् कश्यपस्य वचो यथा । एकदंष्ट्रा पदे यस्य अव्यक्तं न च कोपितम् । भीतदष्टं विजानीयात् यथोवाच प्रजापतिः । यस्य सर्पेण दष्टस्य रेखा दण्डस्य जायते । मददष्टं विजानीयात् कश्यपस्य वचो यथा । द्वे च दंष्ट्रापदे यस्य दृश्येते च महाक्षतम् । क्षुधाविष्टं विजानीयात् यथोवाच प्रजापतिः । द्वे दंष्ट्रे यस्य दृश्येते कश्चिद्रुधिरसंकुले । विषोल्वणं विजानीयाद्दंशं तं नात्र संशयः । अपत्यरक्षणार्थाय जानीयान्नात्र संशयः । यत्तु काकपदाकारं त्रिभिर्दन्तैर्विच्छिद्रितम् । महानाग इति प्रोक्तः कालदष्टं विनिर्दिशेत् । द्विविधं दष्टजातेस्तु लक्षणं समुदाहृतम् । दष्टं दष्ट्वा तु पीतञ्च दष्टोद्धृतं तथैव च । यस्तु सर्पो दशित्वा तु पिबते तु विचक्षण । दष्ट्वा तु पीतं विज्ञेयं कश्यपस्य वचो यथा । विषभागौ तु सर्पस्य त्रिभागस्तत्र संक्रमेत् । उदरं दर्शयेद् यस्तु उद्धृतं तं विनिर्दिशेत् । छर्दितं विषवेगेन निर्विषः पन्नगो भवेत् । असाध्यश्चापि विज्ञेयश्चतुर्दंष्ट्राभिपीड़ितः । ग्रीवाभङ्गो भवेत् किञ्चित् संदष्टो विषयोगतः । आर्द्राऽश्लेषामघायाम्यकृत्तिकासु विशेषतः । विशाखासु त्रिपूर्वासु मूलास्वातिशतात्मके । सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्तथा । शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च । न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते । इतो दंशस्ततः शुद्धो व्यन्तरः परिकीर्त्तितः" भविष्यपु० "अतःपरं प्रवक्ष्यामि कालदष्टस्य लक्षणम् । "जिह्वाभङ्गो हृदिशूलं चक्षुर्भ्याञ्च न पश्यति । दंशञ्च दग्धसङ्काशं पक्कजम्बूफलोपमम् । वैवर्ण्यं चैव दन्तानां श्यामो भवति वर्णतः । सर्वेष्वङ्गेषु शैथिल्यं पुरीषस्य च भेदनम् । भग्नस्कन्धकटिग्रीव ऊर्द्धदृष्टिरधोमुखः । दह्यते वेपते चैव स्वपते च मुहुर्मुहुः । शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्त्तते । दण्डेन ताड्यमानस्य दण्डराजी न जायते । दंशे काकपदे सुनीलसकलजम्बूफलाभं घनम् उच्छूनं रुधिराक्तसैकबहुलं कृष्णाग्निदीप्तो भवेत् । हिक्काश्वासगलग्रहश्च सुमहान् या दुस्त्वचा दृश्यते संस्थानं प्रवदन्ति शास्त्रनिपुणास्तं कालदष्टं विदुः । दंशे यस्याथ शोथः प्रचलितवलितं मण्डलं वा सुनीलं प्रस्वेदो गात्रभेदः स्रवति च रुधिरं घ्राणनासञ्च जल्पेत । दन्तोष्ठाभ्यां वियोगो भ्रमति च हृदयं सन्निरोधश्च तीव्रो हिक्कानामेष दंशस्त्वविपुलमथो विद्धि तं कालदष्टम् । दन्तैर्दन्तान् स्पृशति बहुलो दृष्टिरादार्द्धखिन्ना स्थूलो दंष्ट्रः स्रवति रुधिरं केकरं चक्षुरेकम् । प्रत्यादिष्टः श्वसिति सततं घ्राणनासश्च भाषेत् यद् यद् ब्रूते सकलगदितं कालदष्टं तमायुः । वेपते वेदनातस्तु रक्तनेत्रश्च जायते । ग्रीवाभङ्गश्च लालाभिः